श्रीः ।

शास्त्रमुक्तावळी - १२

तत्त्वनिर्णयः ॥

SATAKOPACHARIAR
TIRUPAPULIYUR
LIBRARY

श्रीवात्स्यवरदाचार्य विरचितः ।

श्रीकाञ्ची

प्रतिवादिभयंकरम् -

3155

SASTHRA MUKTHAVALI. – 12

THE

THATHVA NIRNAYA.

(*VISISHTA DWAITA PHILOSOPHY*).

A 30 A 30

BY

SRI VARADACHARYA

Edited by

P. B. ANANTHACHARIAR *Pandit.*

Printed at the

SRI SUDARSANA PRESS,

CONJEEVERAM.

Price 0– 5 – 0.

(COPY RIGHT REGISTERED.)



श्रीरस्तु ।

॥ शास्त्रमुक्तावळी ॥

श्रीहयग्रीवाय नमः ।

श्रीमते रामानुजाय नमः ।

RSVL 03155

श्रीवात्स्य वरदाचार्य विरचितः

तत्त्वनिर्णयः ।

श्रीमद्रामानुजमुनिवरै र्यामुनाद्यै र्मुनीन्द्रै
रप्याचार्यै र्बहुभि रपरै र्विस्तरेणा भ्यधायि ।
विष्णु स्तत्वं परमिति परन्वाय मन्वादिवाक्यै
र्व्यक्तार्थाभि श्श्रुतिविततिभि स्तद्वयं संक्षिपामः ॥

अत्रैवं साध्यते - नारायणः परं ब्रह्मेति ।

तत्र पूर्वपक्षी मन्यते - रुद्र एव सर्वस्मा त्परं तत्वमिति तथाहि - " यतो वा इमानि " इत्यादिना जगत्कारणमेव परं तत्व मित्यवगम्यते । तच्च कारणं किमित्यपेक्षायां छान्दोग्ये " सदेव सोम्येद मग्र आसीत " इत्यनेन वाक्येन जगत्कारणं सच्छब्दवाच्य मिति प्रतीयते । वाजसनेयके - " ब्रह्मवा इद मेक एवाग्र आसीत् " इति ब्रह्मशब्देन कारणं प्रतिपाद्यते । तत्र सर्वशाखाप्रत्ययन्यायेन सर्वेषां कारणवाक्याना मेकविषयत्वात्, सच्छब्दस्य बृहदबृहत्साधारणतया सामान्यशब्दत्वा, द्ब्रह्मशब्दस्य बृहदर्थकतया विशेषशब्दत्वा त्सामान्यशब्दस्य सति विशेषोपस्थापके ' छागोवा मन्त्रवर्णा ' दिति न्यायेन विशेषपर्यवसानस्य युक्तत्वाच्च, सच्छब्दवाच्यमेव कारणं ब्रह्मशब्देन विशेष्यते । तथा - ऐतरेयके - " आत्मा वा इद मेक एवाग्र आसीत् " इत्यनेन चेतनाचेतनसाधारणब्रह्मशब्दनिर्दिष्टं वस्तु

चेतनैकान्तेना त्मशब्देन विशेष्यते । आत्मशब्दस्यच सर्वचेतन साधारणत्वा द्विशेषाकांक्षायां श्वेताश्वतरोपनिषदि – " यदा तम स्तन्न दिवा न रात्रि र्नसन्न्चासच्छिव एव केवलः । तदक्षरं तत्सवितु र्वरेण्यं प्रज्ञाच तस्मा त्प्रसृता पुराणी " इत्यनेन सविशेष शिव एवेत्यवगम्यते ॥

ननु – महोपनिषदि – " एको हवै नारायण आसीत् " इत्येत द्वाक्योपस्थापितो नारायण एव विशेषो स्तु । नैवं, अस्य वाक्यस्या नुवादकत्वेन स्वयं विशेषोपस्थापनासामर्थ्यात् । अनुवादकत्वंच 'हवा' इति प्रसिद्धवन्निर्देशा दवगम्यते । यथा छान्दोग्ये " सर्वाणि हवा इमानि भूता न्याकाशादेव समुत्पद्यन्ते । " " सर्वाणि हवा इमानि भूतानि प्राणमेवा भिसंविशन्ति । प्राण मेवाभ्युज्जिहत " इत्यनयो र्वाक्ययो र्हवा इति प्रसिद्धवन्निर्देशा दनुवाकत्वं तद्वत । नारायण शब्दो प्याकाशप्राणशब्दव दनुवादलिंगरहितैवकाराद्युपादेयत्वलिंग युक्तवाक्यान्तरोपस्थापित शिवपर एव भवितु मर्हति । अतो रुद्र व जगत्कारणमिति निश्चीयते । अतो मोक्षप्रदत्वमपि तस्यैवार्थ सिद्धम् । " यतो वा इमानी " त्यादिषु जगत्कारणस्यैव मोक्षप्रदत्व प्रतिपादनात् । रुद्रस्य नारायणा त्परत्वं मोक्षप्रदत्वंच श्वेताश्वतरो पनिषद्येव साक्षा च्छ्रूयते – " वेदाह मेतं पुरुषं महान्तम् । आदित्य वर्णं तमसः परस्तात् । तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यते यनाय । यस्मा त्परन्नापर मस्ति किंचिद्यस्मान्नाणीयो नज्यायो स्ति कश्चित । वृक्ष इव स्तब्धो दिवि तिष्ठत्येक स्तेनेदं पूर्ण पुरु-षेण सर्वम् । ततो यदुत्तरतरंतदरूप मनामयम् । य एतद्विदुरमृता स्ते भवन्त्य थेतरे दुःखमेवा पियन्ति । सर्वाननाशिरो ग्रीव स्स र्वभूतगुहाशयः । सर्वव्यापीच भगवान् तस्मा त्सर्वगत शिवः । " इति । अत्रहि ' तेनेदं पूर्ण पुरुषेण सर्व ' मित्यन्तेन पुरुषसूक्तोदितं परमपुरुषं प्रतिपाद्य, ' ततो यदुत्तरतर ' मिति तस्मा त्परं किञ्चिद्वस्तु

निर्दिश्य, ' य एतद्विदुरमृता स्ते भवन्ती ' ति तस्यैव मोक्षप्रदत्वं नान्यस्येत्यभिधाय, ' तस्मा त्सर्वगत श्शिव ' इति तेन विशेषोपादानं क्रियत इति प्रतीयते । तथा छान्दोग्ये दहरविद्यायां – " अथ यदिद मस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरो स्मिन्नन्तर आकाश स्तस्मि न्यदन्त स्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्य " मित्यनेन हृदयपुण्डरीक मध्यवर्त्तित्वेना काशशब्दवाच्यं किञ्चि दस्त निर्दिश्य, तदन्तर्वर्तिनः कस्यचित्तत्वस्य मुमुक्षुभिरन्वेष्टव्यत्व प्रतिपा द्यते । अत्राकाशशब्दनिर्दिष्टस्यै तत्प्रकरणोपसंहारे " आकाशोहवै नामरूपयो र्निर्वहिता, तेयदन्तरातद्ब्रह्म " तिनामरूपयोर्निर्वोढृत्व श्र वणात्, पुरुषसूक्ते " सर्वाणि रूपाणि विचित्यधीरः । नामानि कृत्वा भिवदन् यदास्ते " इति परमपुरुषस्यैव नामरूपकर्तृत्व दर्श नाच्च, आकाशशब्दाभिहितः परमपुरुष इत्यवगम्यते । अतोस्मिन्वाक्ये परमपुरुषादन्यत्तदन्तर्वर्ति किञ्चिद्वस्तु मुमुक्षुभिरुपास्यतयोक्तमिति प्रती यते । तैत्तिरीयके दहरविद्यायां – " दहरंविपाप्मं परवेश्मभूत य त्पुण्डरीकं पुरमध्यसँस्थं । तत्रापिदह्रं गगनं विशोकस्तस्मिन्यदन्त स्तदुपासितव्यन् । यद्वेदादौस्वरःप्रोक्तो वेदान्तेचप्रतिष्ठितः । तस्य प्रकृतिलीनस्य यःपरस्समहेश्वरः । " इति विशेषनिर्णयः क्रियते । तथा बृहदारण्यके – " यएषोन्तर्हृदय आकाश स्तस्मिञ्छेते सर्व स्य वशी सर्वस्येशानः । " इति हृदयमध्यस्थमाकाशशब्देन छान्दोग्य वत्परमपुरुषमभिधाय, तदन्तर्वर्तितया ईशानः प्रतिपाद्यते । तथा अथर्वशिखायां – " कारणन्तुध्येय स्सर्वैश्वर्यसम्पन्न स्सर्वेश्वरश्शम्भु राकाशमध्य " इति । अत्र " ध्येय " इति हृदयमध्यस्थाकाश वर्तितया उपास्य श्शम्भुशब्देन विशेष्यते । " शिवएकोध्येय श्शि वंकरस्सर्वमन्यत्परित्यज्ये " ति तमेव शिवशब्देन निगमयति । तथा तैत्तिरीये " सत्यं ज्ञानमनन्तंब्रह्म योवेदनिहितं गुहायां परमेव्योमन्न " तिगुहा शब्दनिर्दिष्टहृदयान्तर्वर्तितया उपास्य ब्रह्माधारतयाच प्रसिद्धा काशव्यावर्तकपरमशब्दविशेषित व्योमशब्दाभिहित पुरुषोत्तमोपेय

तयोपास्यं ब्रह्मशब्दनिर्दिष्टं वस्तु पूर्वोदाहृत बहुश्रुतिभि रैकार्थ्यात्छिवएवे ति ज्ञायते। तदेवं नारायणात्परः तदन्तर्वर्तितयोपास्य शिवएव प्रतिपाद्यत इति निश्चीयते । तथा अथर्वशिरसि प्रथमखण्डे – " देवाहवैस्वर्ग लोकमगमन् । तेदेवारुद्रमपृच्छन् - कोभवानिति । सोब्रवीत् - अ· हमेकःप्रथममासं वर्तामिच भविष्यामिच नान्यः कश्चिन्मत्तोव्यतिरिक्त" इत्यादिना देवैः पृष्टोरुद्र स्स्वस्य सर्वैश्वर्यं प्रपञ्चयति । " ततोदेवा ऊर्ध्वबाहवोरुद्रमस्तुवन्नि " ति प्रक्रम्य द्वितीयेखण्डे – " योवै· रुद्रस्सभगवान् यश्चब्रह्मा तस्मैवैनमोनमः । योवैरुद्रस्सभगवान् यश्च· विष्णुस्तस्मैवैनमोनमः । योवैरुद्रस्सभगवान् यश्चमहेश्वर स्तस्मैवैनमो नमः । " इत्यादिना देववाक्येन रुद्रस्य सर्वैश्वर्यं सुव्यक्तमुपपादितं। तथा तृतीयचतुर्थयोः – " एकोरुद्रस्सईशानस्सभगवान् महेश्वरस्स· महादेव " इति तदसाधारणानेक नामनिर्देशतस्तन्निर्वचनमुखेन त· स्यैश्वर्यं प्रतिपाद्यते । तथा पञ्चमखण्डे – " तदेतद्रुद्रचरितम् । एषहिदेवःप्रदिशोनुसर्वाः पूर्वोहिजातस्सउगर्भेअन्तः । सविजायमानस्सज· निष्यमाणः प्रत्यङ्मुखास्तिष्ठति सर्वतोमुखः । तदेतदुपासितव्य " मित्यारभ्य, " वालाग्रमात्रं हृदयस्यमध्ये विश्वंदेवंजातवेदंवरेण्यम् । तमात्मस्थंयेनुपश्यन्तिधीराः तेषां शान्तिश्शाश्वतीनेतरेषा " मिति हृद· यमध्यवर्त्तिनोरुद्रस्योपासना न्मोक्षफलमभिधाय , " व्रतमेतत्पाशुपत " मित्युपक्रम्य " अग्निरित्यादिना भस्मगृहीत्वा विमृज्यांगानिसंस्पृशेत् । तस्माद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षाये " ति तदंगत्वेनच समन्त्रक सर्वांगभस्म संस्पर्शलक्षणं पाशुपतव्रत मुक्तम् । श्रीरुद्रादयश्च रुद्रवैभव पराः प्रसिद्धाः । तस्माज्जगत्कारणत्वेन मोक्षप्रदत्वेनच सर्ववेदान्तवेद्यो भगवान् पशुपतिरेवेति सिद्धम् ।

तदेवं रुद्रस्य सर्वस्मा त्परत्वे प्रत्यक्षश्रुतिसिद्धे पौरुषेयवचसां तदानुगुण्येन प्रामाण्या त्तदनुरोधीनि शैवानीतिहासपुराणानि तन्त्राणि च तदुपबृंहणपद मधिरोहन्ति । अन्यानितु प्राजापत्यानि वैष्णवानि

पुराणानि प्रत्यक्षश्रुतिविरुद्धतया " विरोधे त्वनपेक्ष्यं स्या " दिति यायेन्ना नादरणीयानि । उक्तंच मनुना – " या वेदबाह्या स्स्मृतयो श्च काश्च कुदृष्टयः । सर्वा स्ता निष्फलाः प्रेत्यतमोनिष्ठाहिताः स्मृताः । " ति । अत श्शिव स्सर्वस्मा त्परत्वेन सोपबृंहणश्रुतिशतसिद्ध इति ।

अत्रापरः प्रत्यवतिष्ठते । हिरण्यगर्भ एव सर्वस्मा त्परो भवितु र्हति । तथाहि - कारणवाक्यगता स्सद्ब्रह्मात्मशब्दा स्स्वाधारणतया तन्त्रविशेष मपेक्षमाणाः " हिरण्यगर्भ स्समवर्तताग्रे भूतस्य जातः ति रेक आसीदि " ति तुल्यप्रकरणस्थेन हिरण्यगर्भशब्देन विशे- ेता स्तस्मिन्नेव विशेषे पर्यवस्यन्ति । तथा – " अम्भस्य पारे ाक्षनस्य मध्ये " इत्यस्मि न्ननुवाके " यस्मिन्निदँ संच विचैति स- स्मन् । " " यतः प्रसूता जगतः प्रसूती " " नतस्येशे कश्चन तस्य ाम महद्यशः । नसन्दृशे तिष्ठति रूप मस्य न चक्षुषा पश्यति क- श्चनैनम् । हृदा मनीषा मनसा भिक्लप्तो य एनं विदुरमृता स्ते ावन्ती " ति जगत्कारणत्वेन मोक्षप्रदत्वेनच कंचि त्पुरुष मभिधाय, अद्भ्य स्संभूतो हिरण्यगर्भ " इत्यादिना पूर्वोक्तैकवाक्यतया हिरण्यगर्भ स्समवर्तताग्र " इत्यादि ऋगष्टक मुदाहृ द्वाक्यं जग- त्कारणत्वेना नन्यत्वेना नन्येश्वरत्वेन मोक्षप्रदत्वेनच पूर्वोक्तः पुरुषो हिरण्यगर्भ एवेति स्पष्टयति ।

ननु–" अद्भ्य स्संभूत " इत्यनुवाक श्चात्र पूर्वोक्तैकवाक्यतया दाहृतः । सच " ह्रीश्च ते लक्ष्मीश्च पत्न्या " वि ति लक्ष्मीपतित्व लिङ्गा न्नारायणपर इति निश्चीयते । मैवम्, लिंगाच्च श्रुते र्बलीयस्त्वात् । हिरण्यगर्भ स्समवर्तताग्र " इति हिरण्यगर्भशब्द एव निरपेक्षो वि- ष मुपस्थापयति । एकपदसामर्थ्य श्रुतिः, वाक्यसामर्थ्य लिंग ति मीमांसकाः । तथोत्तरत्रापि- " सूर्याचन्द्रमसौ धाता यथा पूर्व कल्पयदि " ति जगत्कारणं हिरण्यगर्भपर्यायतया प्रसिद्धेन धातृ ब्देन निर्दिशति । " प्रजापतिः प्रजा असृजते " त्याद्याः काश्चन

कारणविषयाः श्रुतयः प्रजापतिमेव कारणत्वेनो पदिशन्ति । तथा छान्दोग्ये दहरविद्यायां – " प्रजापते स्सभां वेश्म प्रपद्य " इति सु क्तप्राप्यः प्रजापति रभिधीयते ।

ननु – "नसन्नचासच्छिव एव केवलः । " " शंभु राकाशमध्ये ध्येयः " " यः पर स्स महेश्वर " इत्यादिषु शिवशब्दमहेश्वरशब्दोप स्थापितविशेषपर्यवसायित्वं सद्ब्रह्मात्मादिसामान्यशब्दाना मुक्तम् । सत्य मुक्तं।दुरुक्तन्तु तत, शिवादिशब्दानामपि साधारणत्वात्, हिरण्यगर्भशब्द स्या साधारणत्वाच्च । तथाहि-शिवशब्द स्तावत् ' शिवोस्तु सर्वज- गतां ' ' शिवा स्ते सन्तु पन्थानः ' ' शिवं कर्मास्तु ' तैत्तिरीयके " शिवान श्शन्तमा भव " श्वेताश्वतरोपनिषदि " शिव शिवानाम शिवो शिवानां " " यो व शिवतमो रस " इति लोकवेदयो श्शुद्धि मांगळ्यादिगुणयोगेना नेकार्थसाधारणतया प्रयुज्यमानो दृश्यते । श- म्भुशब्दस्यापि " शंभु स्स्वयंभु र्द्रुहिण " इत्यादिषु द्रुहिणविषयतया प्रयोगो दृष्टचरः । महेश्वरशब्दोपि महानीश्वर इत्यवयवशक्त्या राजा- दिषु प्रयुज्यते । रुद्रशब्दश्च " रुद्रो वा एष यदग्निः + + + + + हविष्मन्तो नमसा विधेमते " इत्यादिषु गुणयोगेना ग्नयादिषु प्रयुक्तोहि दृष्टः । नचैवं हिरण्यगर्भशब्दस्य चतुर्मुखा दन्यत्र प्रयोगो दृष्टचरः, येन शिवादिशब्दवत्साधारण्यं स्यात । " एकोह वै नारायण " इत्यादिवाक्यंतु प्रसिद्धवन्निर्देशा दनुवादक त्वात नविशेषोपस्थापनक्षम मित्युक्तम् । अतो हिरण्यगर्भ एव मुमुक्षुभि र्जिज्ञास्यं परं ब्रह्मेति वेदान्ताः प्रतिपादयन्तीति सिद्धम् । तदुपबृंहणानि चतुर्मुखपुराणादीनि । इतराणितु श्रुतिविरोधा दुपे- क्षणीयानि । अत एव भगवान् मनुः – "तत स्स्वयंभु र्भगवानि " ति स्वयंभुशब्देन जगत्कारणं निर्दिशति । स्वयंभुशब्द श्चतुर्मुखपर्याय तया प्रसिद्धः । तस्मा च्चतुर्मुख एव ब्रह्मतया सोपबृंहणवेदान्त सिद्ध इति स्थितम् ।

अत्रप्रतिविधीयते - नारायणः परंब्रह्म, कारणवाक्ये तस्यैव परम कारणत्व श्रवणात् । मोक्षप्रकरणेषु मोक्षप्रदत्व मुक्तप्राप्यत्व श्रवणाच्च ।

तथाहि - कारणवाक्येषु सद्ब्रह्मात्मशब्दास्साधारणा विशेषपर्यवस्थानसाकांक्षाः " एकोहवै नारायण आसी न्नब्रह्मानेशानो नाग्नीषो मौ नेमेद्यावापृथिवी न नक्षत्राणि नाहो नाग्निर्नसोमोनसूर्यस्सएकाकी नरमेत तस्यध्यानान्तस्थस्य एकाकन्यादशेन्द्रियाणी " त्यारभ्य "अथपुरुषेवै नारायणस्सोन्यं कामंमनसाध्यायत तस्यध्यानान्तस्थस्य ललाटात्स्वेदोपतत् । स्वेदाद्बुद्बुदमभवत् । बुद्बुदात्त्वक्ष शूलपाणिः पुरुषोजायत । " इत्यादि महोपनिषदुपस्थापित नारायणएव पर्यवस्यन्ति ।

नन्विदं वाक्यमनुवादकमित्युक्तं ? सत्यम्, तदेवायुक्तमितिब्रूमः । शास्त्रस्या प्राप्तप्रापकत्वस्वभावात्, नारायणकारणत्वस्य प्रमाणान्तरा प्राप्तत्वाच्च ।

नच " सर्वाणिहवा इमानिभूतानी " त्यादिषु प्रसिद्धवन्निर्देशमात्रा दनुवादकत्वं, " यदाग्नेयोष्टाकपालः " " उपरिहि देवेभ्यो धारयती " त्यादिष्वप्यनुवादकत्वप्रसंगात् ।

नच तत्राप्यनुवादकत्वं," वचनानित्व पूर्वत्वात् " " विधिस्तु धारणे पूर्वत्वात् " इति कर्मकाण्डसूत्राभ्यां तेषामपि विधित्व समर्थनात । " सर्वाणिहवाइमानी " त्यादौ तु प्रमाणान्तरेण कार्यतया हेयतयाचावगतस्याकाशादेः परमकारणत्व परमप्राप्यत्व तदनुगुण कल्याणगुणाकरत्वादि प्रतिपादनानुपपत्तेः, " अस्यलोकस्यकागति " रित्युपक्रमादिना विधेयान्तरप्रतीतेश्च, " आकाशस्तल्लिंगात् " " अतएव प्राण " इति सूत्राभ्यामनुवादकत्व मुक्तं । प्रसिद्धव न्निर्देशस्यत्वनुवादकत्व साधक प्रमाणान्तरानुग्राहकत्वमात्रं, तावता तत्र प्रसिद्धवन्निर्देशस्यानुवादकत्व हेतुतयोक्तिः । " एकोहवै नारायण " इत्यत्र तु नविधेयान्तरप्रतीतिः, प्रत्युतनारायणस्यैव

परमकारणत्वं विधेयतया प्रतीयते, नारायणव्यतिरिक्तस्य ब्रह्मरुद्रादेः कृत्स्नस्य जगतस्तस्मिन्नेव प्रळयाभिधानात्, तस्मादेवोत्पत्तिवचनाच्च । नच नारायणस्य प्रमाणान्तरेण कार्यत्वमवगतं, येनाकाशादेरिव तस्य परमकारणत्व प्रतिपादनं विरुध्येत । " ब्रह्म विष्णु रुद्रेन्द्रास्ते सर्वेसंप्रसूयन्त " इति वचनन्तु विष्णो र्नकार्यत्वप्रतिपादनपरमिति वक्ष्यते । अतोनानुवादकत्वमस्य वाक्यस्येति तदुपस्थापिते विशेषे सदादिशब्दाः पर्यवस्यन्ति । अस्तुवानुवादकत्वमस्य वाक्यस्य, तथा प्यनुवादलिंगरहित सप्रमानरूपानेक श्रुत्यन्तरसिद्ध नारायण कारणत्व मनुवदतु, नविरूपवाक्यार्थ । सन्तिबहून्यौपनिषदानिवचांसि तदेककारणत्वप्रतिपादनपराणि । सुबालोपनिषदितावत - " तदाहुः किन्तदासीत् । नैवेहकिञ्चनाग्र आसीत् । अमूलमनाधाराः इमाः प्रजाः प्रजायन्ते । दिव्यो देवएको नारायण " इत्यादि । पुरुषसूक्तेच " तस्माद्विराडजायत । विराजो अधिपुरुष " इत्यादि । नारायणानुवाककठवल्ल्यादिषुच तस्यैव मोक्षप्रदत्व मुक्तप्राप्यत्वादिवचनेन जगत्कारणत्व मप्यर्थादुक्तम् । " यतोवा इमानि भूतानि जायन्ते । " " असद्वा इदमग्र आसीत् । ततोवै सदजायत । तदात्मानँस्वयमकुरुत । तस्मात्तत्सुकृत मुच्यतइति । यद्वैतत्सुकृतं । रसोवैसः । रसँह्येवायं लब्ध्वानन्दी भवती" त्यादिषु जगत्कारणस्यैव मोक्षप्रदत्व मुक्त प्राप्यत्व प्रतिपादनात् । तस्मान्नेहोपनिष द्वाक्यस्यानुवादकत्वेपि देवतान्तरकारणत्वानुवादकत्वप्रसंगः । प्रसिद्धवन्निर्देशे ष्यपूर्वार्थ प्रतिपादनान्नानुवादकत्वमित्युक्तं । श्रुत्यन्तराणि चैवं दृश्यन्ते । यथा नारायणोपनिषदि - " अथपुरुषोहवै नारायणोकामयत प्रजास्सृजेयेति । + + + नारायणाद्ब्रह्माजायते । नारायणाद्रुद्रोजायते । नारायणादिन्द्रोजायते । नारायणात्प्रजापतयः प्रजायन्ते । नारायणाद्वादशादित्या रुद्राष्टवसवःसर्वाणिच छन्दाँसि नारायणादेव समुत्पद्यन्ते । नारायणात्प्रवर्तते । नारायणेप्रलीयन्ते । " , " महोपनिषदिच - " सर्वस्यवशिनन्देवं

R 672
N02

SATAKOPACHARIAR
TIRUPATI
LIBRARY

सर्वस्यायतनंहरि " मित्यारभ्य " यन्नाभिपद्मादभवन्महात्मा ब्रह्मा पतिर्विश्वसृग्विश्वरूपः । समेवविदित्वातिमृत्युमेति नान्यः पन्थाविद्यतेयनाये " ति । अतः कारणवाक्येषु नारायणएव परमकारणतया प्रतिपाद्यतइति निश्चीयते । "नसन्नचा- सच्छिवएवकेवल" इत्यत्र कारणविषय शिवशब्दोपि सद्ब्रह्मात्मशब्दव न्नारायणमेवा भिधत्ते । उक्तरीत्या नारायणस्यैव कारणवाक्यविषयत्वात् । " शाश्वतँ शिव मच्युतम् । नारायणं महाज्ञेय " मित्यादिषु शिवशब्दस्य तस्मिन्नपि दृष्टप्रयोगत्वाच्च । अस्यच रुद्रव्यतिरेकेणा नेकार्थेषु लोक वेदयोः प्रयोगो दर्शितः । नचैवं नारायणशब्दस्या र्थान्तरे प्रयोगो दृष्टचरः । अत शिवशब्दस्य साधारणतया सावकाशत्यात्, नारायणशब्दस्य तद्विपर्ययात्, नारायणकारणत्वस्य बहूपनिषत्प्रतिपादितत्वात्, शिवशब्दोपेतकारणवाक्यस्य चैकत्वात्, नारायणशब्दस्य एकैकस्या मुपनिषदि बहुशोभ्यस्यमानत्वात्, शिवशब्दस्य तदभावात्, " नब्रह्मानेशानः " " बुद्बुदात्मवक्ष शूलपाणिः पुरुषो जायत " " नारायणा द्ब्रह्मा जायते " स्थाणु रव्यक्ता दभव न्महेशः " ऋग्वेदे " यतो जज्ञ उग्र स्त्वेष " इत्याद्यनन्यपरा नेकश्रुत्यन्तरेषु कार्यतया प्रतिपन्नस्य प्रसिद्धशिवस्य परमकारणत्व प्रतिपादनानुपपत्तेः, नारायणस्य तदभावाच्च, सर्वेषु कारणवाक्येषु स एव परमकारणतया प्रतिपादन महंति । किंच - " अस्य देवस्य मीढुषो वाव विष्णो रेतस्य प्रभुदे हविर्भिः विधेहि रुद्रिय महित्व " मिति बहृचश्रुत्या रुद्रस्य भगवत्समाराधनलब्ध माहिमवत्त्वं प्रतीयते । तस्मा न्नारायण एव परमकारणं न रुद्र इति निरवद्यम् ।

यत् पुनः-" हिरण्यगर्भ स्समवर्तताग्र " इति हिरण्यगर्भस्य कारणत्वं प्रतीयत इति । तदसत्, आकाशादिवत्प्रमाणान्तरेण कार्यतया वगतस्य परमकारणत्वासम्भवादेव । दृश्यन्तेहि तस्य कार्यता प्रतिपादनपरा श्रुतयोपनिषदानि । श्वेताश्वतरे " यो ब्रह्माणं विदधाति

SRI VENKATESWARA ORIENTAL LIBRARY TIRUPATI

पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै " इति । श्रुत्यन्तरेषुच - " तत्र ब्रह्मा चतुर्मुखो जायत । नारायणा द्ब्रह्मा जायते । " यजुषिच - " स प्रजापति रेकः पुष्करपर्णे समभवत् । " " ब्रह्म वै ब्रह्माणं पुष्करपर्णे सृजत । " " विराजो अधिपुरुषः । " इत्यादीनि । अतः कारणविषयो हिरण्यगर्भशब्दो व्याकाशादिशब्दव दवयवशक्त्या पर्यवसानवृत्त्यावा नारायण एव वर्तते । किञ्च - "अम्भस्य पार" इत्यस्मिन्ननुवाके - " य मन्त स्समुद्रे कवयो वयन्ति " " सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधी " त्यब्धवगतविद्युद्भर्णत्व जलधिशायित्व पुरुषत्वादिलिंगवशेना वधारितनारायणभावं पुरुषं जगत्कारणतया मिधाय, " नतस्येशे कश्चन तस्य नाम महद्यशः । य एनं विदुर मृता स्ते भवन्ती " ति तस्यैवानन्येश्वरत्वं मोक्षप्रदत्वं चोक्त्वा, " अद्भ्य स्संभूतो हिरण्यगर्भ इत्यष्टा " विति पूर्वोक्तैनैकवाक्यतया " हिरण्यगर्भ स्समवर्तताग्र " इति ऋगष्टक मुदाहर द्भाष्यं हिरण्यगर्भशब्दस्य नारायणविषयता मवगमयति । अपिच " हिरण्यगर्भ " इत्यादेः " अद्भ्य स्संभूत " इत्यनुवाके नैकवाक्यत्वावगमात् तस्यच " द्यावा च ते लक्ष्मीश्च पत्न्या " विति लक्ष्मीपतित्वलिंगात् पुरुषसूक्त प्रकरणाच्च नारायणपरत्वनिर्णयात् हिरण्यगर्भशब्दस्य कार्यभूतचतुर्मुखगोचरत्वासम्भवेन श्रुते रसिद्धत्वात् । एकपदसामर्थ्यहि श्रुतिः, तच्छाम्निना सिञ्च दित्यादिवदयोग्यार्थत्वे न सम्भवति ।

ननुच पुरुषसूक्तस्य नारायणपरत्वएव किं प्रमाणं ? उच्यते, नारायणानुवाकोक्त सहस्रशीर्षत्व विश्वाक्षत्वपुरुषत्वलक्षणः पुरुषसूक्ते प्रत्यभिज्ञायमानो नारायण एव भवितु महति । सुबालोपनिषदि " चक्षुश्च द्रष्टव्यंच नारायणः " इत्यारभ्य नारायणस्य सर्वात्मत्वं प्रतिपाद्य " पुरुष एवेदं सर्वंम " ति पुरुषशब्देन निगमना त्पुरुषसूक्तं नारायणपरमिति विज्ञायते । अथर्वणेचाष्टादशमहाशान्तिप्रक

रणे तत्तद्देवताविशेषविषयक महाशान्तौ तत्तद्देवताकमन्त्रविनियोगा
वस्मरे " वैष्णव्यां पुरुषसूक्त " मिति वैष्णवमहाशान्तिमन्त्रत्वेना स्य
विनियोगा द्विष्णुविषयत्वं प्रतीयते । एतदेकवाक्योक्तरानुवाकोक्त
लक्ष्मीपतित्वलिंगाच्चास्य तद्विषयत्वनिश्चयः । कल्पसूत्रकाराश्च " सह
स्रशीर्षा पुरुष इत्युपदिशं पुरुषेण नारायणेन " " अथ नारायणाभ्या
मुपस्थानं " " उत्तरेणनारायणेना दित्य मुपतिष्ठत " इति चास्य सूक्त
स्य नारायणविषयतां दर्शयन्ति । " पुरुषस्य हरे स्सुक्तं स्वर्ग्यं धन्यं
यशस्कर " मिति स्मृतेश्च नारायणपरत्व मवसीयते । उक्तेनैव
न्यायेन " धाता यथा पूर्व मकल्पय " दित्यत्र धातृशब्दः परमका
रुणिकपरत्वेन नारायणपरो द्रष्टव्यः । अवान्तरसृष्टिकारणपरत्वेतु चतु
र्मुखपरत्वेपि नविरोधः । " प्रजापतिः प्रजा असृजत " त्यत्रापि
तथैव प्रजापतिशब्दोपि ।

यत्तु – " प्रजापते स्सभां वेश्म प्रपद्य " इति मुक्तप्राप्यत्वे
नोक्त श्चतुर्मुख इति । तदयुक्तं, नारायणानुवाक कठवल्ल्यादिषु ना
रायणस्यैव मुक्तप्राप्यत्वश्रवणात् । दहरविद्यायाश्च तत्परत्वस्य वक्ष्य
माणत्वेना स्य वाक्यस्य तदुपसंहारावगतस्य तद्विषयत्वस्यैव युक्त
त्वात्, प्रजापतिशब्दस्या वयवशक्त्या चतुर्मुखसृष्टदक्षादिष्वपि प्रयु
क्तत्वात्, " पतिं विश्वस्यात्मेश्वर " मित्याद्युक्तनारायणानुवादित्व
सम्भवाच्च । तदेतत्सूत्रकारेणैव " नच कार्ये प्रत्यभिसन्धि " रिति प्रत्य
वादि । " तत स्स्वयंभू र्भगवानि " त्यत्र स्वयंभु शब्दोपि नारायणपरः ,
उक्तरीत्या नारायणस्यैव कारणत्वनिर्णयात्, वासुदेवैकवाचकधने उप
लब्धसामानाधिकरण्याच्च । " तेन नारायण स्मृतः " " तृतीयात् , य
ष्मोलोके ब्रह्मेतिकीर्त्यते " इति नारायणचतुर्मुख अतोबलवदुप -
पावेन निर्देशाच्च नारायणएव परमकारणं न चणैव युक्तेति वेद-

किञ्च- " सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवपक्रमविरोधात् " त-
द्ब्रह्मासशिव रसेन्द्रस्सोक्षर-परमःस्वराट् " इ परत्वं नप्रतिपादयति

स्सर्वशाखासु परतत्वप्रतिपादनपराणां शिवेन्द्राक्षरब्रह्मादि सामान्यशब्दानां नारायणविषयत्वं न्यायनिरपेक्षं कण्ठोक्त्यादर्शयन्, परत्वेन शंकितयोर्ब्रह्मरुद्रयोरपीन्द्रादि तुल्यतया तद्विभूतित्वंच प्रतिपादयति ।

अयंचा नुवाक स्सर्ववेदान्तोदित सर्वपरविद्योपास्य विशेषनिर्धारणविधिपरः, नोपासनविधिपरः, नापि प्रकृतदहरविद्यामात्रोपास्य विशेषनिर्णयपरः, इति " लिंगभूयस्त्वा " दित्यस्मिन्नधिकरणे निरणायि । नच " नारायणपरंब्रह्म " " नारायणपरोज्योति " रिति वाक्ययोः पंचमीसमासशंकनीयः, " विश्वंनारायणं हरि " मित्यारभ्य " तत्वंनारायणःपरः " " अन्तर्बहिश्च तत्सर्वंव्याप्य नारायणःस्थितः । " "सब्रह्मा सशिव स्सेन्द्र " इत्यादिभि र्नारायणस्यैव सर्वस्मात्परत्वेन निर्णीयमानत्वात्, तस्मादन्यस्य परत्वासम्भवात् । अत " स्सुपांसुलुगि " ति लुप्तप्रथमाविभक्तिकोयं निर्देशः ।

महोपनिषच्चेमं संशयं व्युदस्यन्ती – " नारायणःपरंब्रह्म तत्वं नारायणःपरः । नारायणपरोज्योति रात्मानारायणःपर " इति सविभक्तिकं ब्रवीति । समस्तपदत्वेपि निषादस्थपतिन्यायेन पंचमीसमासः समानाधिकरणसमासोन्याय्यः । तस्मादस्मिन्नुवाके वेदान्तेषु मुमुक्षूपास्यत्वेन जगत्कारणत्वेन जगदन्तर्यामित्वेनच प्रसिद्धं परब्रह्मादि सामान्यशब्दानिर्दिष्टं वस्तु तत्प्रत्यभिज्ञापकै रेवशब्दैरनूद्य तस्यनारायणत्वं विधीयते । यथा – " जुह्वाजुहोति " इति होमसाधनतयाविहितांजुहूं " यस्यपर्णमयीजुहू र्भवती " ति वाक्येन तत्प्रत्यभिज्ञापकशब्देनानूद्यतस्याः पर्णमयीत्वं विधीयते । मैत्रेयोपनिषदि रायणानुवाकोक्तिर्तुवरेण्यं ध्रुवमचलममृतं विष्णुसंज्ञंसर्वाधारं धामे " ति प्रत्यभिज्ञायमानो ऽत्व सर्वाधारत्वविशिष्टतया सर्ववेदान्तप्रसिद्धं पर- " चक्षुश्च द्रष्टव्यंच विशिष्यते । कठवल्लीषु चायमर्थः स्पष्टीक्रियते – प्रतिपाद्य " पुरुष एवेन्द्रि + ततेपदंसंग्रहेण ब्रवीमी " त्यारभ्य " सोषसूक्ते नारायणपरमिति द्विर्णोःपरमंपद " मित्यन्तेन । अत्र सर्ववे-

द्धान्तप्रतिपाद्यं परमप्राप्यं यद्वस्तु तद्वैष्णवंपदमिति कण्ठोक्त्या निर्णीयते । ईदृशानि वेदान्तवाक्यानि परश्शतानि विस्तरभयान्न लिख्यन्ते । अतो नारायणःपरंब्रह्म ।

यत्पुनरुक्तं श्वेताश्वतरोपनिषदि " ततोयदुत्तरतर " मित्यादिना रुद्रस्य नारायणात्परत्वं मोक्षप्रदत्वंच प्रतिपाद्यत इति । तदयुक्तं , उपक्रमविरोधात । उपक्रमेहि " वेदाहमेतं पुरुषंमहान्त " मिति महापुरुषमभिधाय, " तमेव विदित्वातिमृत्युमेति नान्यःपन्थाविद्यते यनायं " ति तद्वेदनस्यैव मोक्षहेतुत्वं नान्यस्येत्यर्थद्वयं प्रतिज्ञातम् । अथान्तरंच तदुपपादनाय " यस्मात्परन्नापरमस्ति किंचि " दित्यादिना सएव सर्वस्मात्परोनान्य इति प्रतिपादितम् । यस्मादपरं किंचित्परं नास्तीत्यन्वयः । निरस्तसमाभ्यधिक सम्भावन इत्यर्थः । अन्यथाहि प्रतिज्ञानुगुण्यं नस्यात् । तथाच श्रुतिः - " नतत्समश्चाभ्यधिकश्च दृश्यते " इति । अतः " ततोयदुत्तरतर " मित्यस्य तस्मादन्यस्य सर्वस्मात्परत्व प्रतिपादनपरत्वं विरुध्यते । उपक्रमस्यचोपसंहारा द्बलीयस्त्वमुपक्रमाधिकरण सिद्धम् । तथाहि - " उच्चैःऋचा क्रियते -उपांशुयजुषा उच्चैस्साम्ने " त्यत्र उच्चैस्त्वादिकं किं ऋगादिमन्त्रधर्मः; उतान्यन्त्रप्रायवेदधर्म इति संशय्य मन्त्रवाचक ऋगादिशब्दस्वारस्येन मन्त्रधर्मत्वं युक्तम् । उपक्रमस्थ वेदशब्दस्तु वेदयतीति व्युत्पत्त्या ऽर्थप्रकाशनपरोभवितु मर्हति । वेदशब्दस्वारस्यानुरोधेन वेदधर्मत्वे क्षणिकत्व मृगादिपदानां स्यात् । अतो मन्त्रधर्मएवोच्चैस्त्वादि रिति पूर्वपक्षे प्राप्ते - मन्त्रब्राह्मणसमुदायरूप वेदधर्मत्व मुच्चैस्त्वादे रुपक्रम स्वारस्याद्युक्तम् । उपक्रमोद्य संजात विरोधितया चरमभाविन उपसंहाराद्बलीयान् , यथा वह्नावौष्ण्यप्रत्यक्षं तद्विरोध्यनुमानात् , यच्च श्रुतिलिंगादिषु पूर्वपूर्वादुत्तरोत्तरं बलवत् । अतोबलवदुपक्रमस्वारस्यानुरोधेन दुर्बलोपसंहार गतऋगादिलक्षणैव युक्तेति वेदधर्मत्वमेवोच्चैस्त्वादेरिति सिद्धान्तितम् । अतः उपक्रमविरोधात् " ततोयदुत्तरतर " मिति वाक्यं परमपुरुषादन्यस्य परत्वं नप्रतिपादयति

यदुच्यते - सामान्यशब्दोहि विशेषसन्निधौ संकुचितार्थो दृष्टः - गामानयबलीवर्दचेति , इहच " ततोयदुत्तरतर " मित्यादिना परम पुरुषव्यतिरिक्तस्य कस्यचित्परत्व वचनात, " नान्यःपन्थाः " " यस्मा त्परन्नापरमस्ति किंचिदि " ति सामान्येन परमपुरुषव्यतिरिक्त सर्व-विषयतया प्रतीयमान परत्वनिषेध स्तद्व्यतिरिक्त विषयो-भवितु महतीति । तन्न, नह्यत्र गोबलीवर्दन्यायः क्रमते, शब्दान्त रवैयर्थ्यपरिहाराय पदान्तरार्थसंकोचोहि गोबलीवर्दन्यायः । " नान्यः पन्थाः " " यस्मा त्पर न्नापर मस्ति किंचिदि " त्यनयोः रसंकोचे " ततो यदुत्तरतर " मित्यस्य नर्वैयर्थ्यप्रसंगः , प्रतिज्ञातस्यैव सहे-तुकनिगमनेना र्थान्तरसम्भवात । किंच " तस्मा त्सर्वगत शिव " इत्युक्त्वा " महान् प्रभु र्वै पुरुष स्सत्वस्यैष प्रवर्तक " इति मोक्षो-पयोगिसत्वप्रवर्तकत्वेन महापुरुषमेव " वेदाह मेतं पुरुषं महान्त " मित्युपक्रान्तं प्रत्यभिज्ञापयति । तथाच मैत्रेयोपनिषदि सत्वप्रवर्त-कत्वं विष्णो रसाधारणधर्मतया श्रूयते " अथ योह खलु वा अस्य सात्विकोंश स्सोसौ ब्रह्मचारिणो योयं विष्णुः, अथ योह खलु वाअस्य तामसोंश स्सोसौ ब्रह्मचारिणो योयं रुद्र " इति । इहच पूर्वस्मि न्वाक्ये - " सर्वाननशिरो ग्रीव स्सर्वभूतगुहाशयः । सर्वव्यापीच भगवान् तस्मा त्सर्वगत शिव " इति पुरुषसूक्तनारायणानुवाका-दिषु परमपुरुषासाधारणधर्मत्वेन प्रसिद्धसर्वाननशिरोग्रीवत्वादिद-र्शनात् स एवेति प्रत्यभिज्ञायते । तत श्चास्मि न्प्रकरणे परमपुरुष एव प्रतिपाद्यत इति । " तस्मा त्सर्वगत शिव " इति शिवशब्दोपि शुचित्वादिगुणयोगेन तस्मिन्नेव वर्तते । दृष्ट श्चास्यात्रापि " शाश्वतं शिव मच्युत " मिति तस्मिन्नेव शिवशब्दप्रयोगः ।

यच्चोक्तम् - छान्दोग्ये दहरविद्यायां " अथ यदिद मस्मिन्ब्रह्म पुरे दहरं पुण्डरीकं वेश्म " त्यादिना नामरूपनिर्वोढृत्वेन विशेषिता काशशब्देन परमपुरुषं निर्दिश्य, तदन्तर्वर्तिनः कस्यचित्तत्वान्तरस्यो

ान्यत्व मुक्तमिति । तदप्यश्रोत्रियाणां श्रद्धामात्रविजृंभितं । यतः
ति रेवेदं तत्र प्रश्नपूर्वकं परिहरति । तथाहि – " दहरोस्मिन्नन्तर
ाकाश स्तस्मिन्यदन्त स्तदन्वेष्टव्यं तद्वावविजिज्ञासितव्य " मित्यत्र –
किं तत्र विद्यते यदन्वेष्टव्यं यद्वा वविजिज्ञासितव्य " मिति परिचोद्य
परिजिहीर्षया " यावान्वा अय माकाश स्तावानेषोन्तर्हृदय आ-
ाशः । उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते । उभावग्निश्च
ायुश्च सूर्याचन्द्रमसा वुभौ । विद्युन्नक्षत्राणि यच्चेहास्ति यच्च ना-
त्त सर्वं तदस्मि न्समाहितं, नास्य जरयै तज्जीर्यति नवधेनास्य
न्यते, एत त्सत्यं ब्रह्मपुर " मिति प्रकृतस्य दहराकाशस्यातिमह
त्सर्वाधारत्वादिक मभिधाय, " अस्मिन् कामा स्समाहिता " इति
हान्तर्वर्तित्वेनोपास्यतयोक्ताः ' कामा ' इति परिहृत्य, कोयं दहरा-
ाशः केच तदाश्रयाः कामा इत्यपेक्षायां, " एष आत्मापहतपाप्मा
ज्जरो विमृत्यु र्विशोको विजिघत्सो पिपास स्सत्यकाम स्सत्यसंक-
" इति दहराकाशशब्दनिर्दिष्टः परमात्मा तदाश्रयाश्च काम्यतया
ाम्शब्दनिर्दिष्टा अपहतपाप्मत्वादय स्सत्यसंकल्पपर्यन्ता स्तद्गुणा
ा स्पष्टीकृत्य, " अथ य इहात्मान मनुविद्य व्रजन्त्येतांश्च सत्या
ामां स्तेषां सर्वेषु लोकेषु कामचारो भवती " त्यपहतपाप्मत्वा
गुणाष्टकविशिष्टं परमात्म विदां सत्यसंकल्पतोपलक्षितमोक्ष
सिद्धिं दर्शयति । तदेतद्वाक्यकारेण सुव्यक्त मुक्तम् – " तस्मि
हान्तरिति कामव्यदेश " इत्यादिना । कथं तर्हि तस्मिन्यदन्त
दन्वेष्टव्य मित्युपक्रमे दहराकाशान्तर्वर्तिमात्रोपासन मुपपद्यते ।
यते, नात्र तदन्तर्वर्तिमात्रोपासनं विधीयते, किन्तु उभयोपा-
, " अथ य इहात्मान मनुविद्ये " त्यादिना उभयोपासननिगम-
। किं पुन रत्रोभयोपस्थापकपदं? " तदन्वेष्टव्य " मिति
छब्द इतिब्रूमः । कथंतर्हि " तस्मिन्यदन्त " रिति तदन्तर्व
ागोचर यच्छब्दनिर्दिष्टपरामर्शित स्तच्छब्दस्योभयोपस्थापक-

त्वं ? तदुच्यते, " तस्मिन्यदन्तरि " ति यच्छब्दोप्युभयविषयएव । तस्मिन्यदन्तरितिवाक्यस्यायमर्थः - हृदयपुण्डरीकमध्यवर्तीयोदहराकाशः, यच्च तदन्तर्वर्तिगुणजातमिति । कथ मेकेन यच्छब्देनोभयपरामर्शः, लिंगद्वयविषयस्यवा कथ मेकवचनान्तत्वं, एतत्सर्वं भगवान् पाणिनिः परिहरति " त्यदादीनि सर्वैर्नित्यं " " नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या " मिति सर्वनामशब्दै स्समभिव्याहारे त्यदादीनां नित्यमेकशेषत्वं, नपुंसक शब्दद्वय सान्निपाते नपुंसकैकशेषत्वं तस्यच विकल्पेनैकवद्भावं ब्रुवाणः । तत्तद्गुणविषयस्य यच्छब्दस्यैकवचनान्तत्वं जात्यभिप्रायं । अस्मिन्कामा इत्यर्थबहुत्वावगमात् । ननु - प्रथमश्रुतैकवचन स्वारस्यानुरोधेनास्मिन् कामाइति बहुवचनस्यादितिः पाशानितिवत् विवक्षास्तु । मैवं, तस्मिन्यदन्तरित्येकवचनस्य उद्देश्यत्वेन अस्मिन्कामाइति बहुवचनस्योपादेयत्वाच्च । उपादेयगतयोस्तल्लिंगवचनयो र्विवक्षितत्वं उद्देश्यगतयोश्चा विवक्षितत्वमिति ग्रहैकत्वाधिकरणेनिर्णयः । नचोपक्रमावगतगुणमात्रोपासन विध्यनुरोधेनोपसंहाराव गतगुण्युपासन विधिभंगः शंकनीयः, उपक्रमावगतगुणोपासनविध्यबाधेन गुण्युपासनोपसंहारात् । उपक्रमाधिकरणेहि उपक्रमावगतस्य उपसंहारेण बाधो नयुक्तइत्युक्तं । अतोस्मिन्वाक्ये परमपुरुषस्यैवापहतपाप्मत्वादिगुणाष्टकाविशिष्टस्योपास्यत्व प्रतिपादनात् नान्यस्य कस्यचिदुपास्यत्वप्रतीरितिस्थितम् ।

यदप्युक्तं - तैत्तिरीयकदहरविद्यायां - " दहरंविपाप्म " मित्यादिना परमपुरुषान्तर्वर्तिनः कस्यचित्तत्वस्योपास्यत्वादिक मुक्त्वा तद्विशेषजिज्ञासायां "यःपरस्समहेश्वर" इतिविशेष निर्णयश्चक्रियतइति तदप्ययुक्त, सर्ववेदान्तप्रत्ययन्यायेनास्यदहरविद्यावाक्यस्य छान्दोग्योक्तदहरविद्यावाक्यैकार्थ्यात्तस्यचा पहतपाप्मत्वादिगुणाष्टक विशिष्टपरमपुरुषपरत्वानिर्णया दस्यापि गुणाष्टकविशिष्ट परमपुरुषोपासनविधिप-

त्वनिश्चयात् । अतएव " यःपरस्तमहेश्वर " इति सर्ववाचक जात-
प्रकृतिभूताकारवाच्यतयाप्रसिद्धं यच्छब्देनानूद्यतस्य महेश्वरत्वं प्रतिपा-
द्यते । अकारवाच्यतयाप्रसिद्धश्च " अकारोविष्णुवाचक " इत्यादि
भिर्विष्णुरेव । " अकारोवैसर्वावाग् " इतिचाकारस्य सर्ववाग्वकजात
प्रकृतिभूतत्वं ज्ञायते । " अहतिब्रह्मे " तिच श्रुत्याब्रह्मणोकारवाच्य-
त्ववगमादनन्य परकारणवाक्य नारायणानुवाकादिभि नारायणस्यैव
परब्रह्मत्वनिश्चयाच्च सएवाकारवाच्यइतिनिश्चीयते । अतश्चाकारवाच्य
त्वयाप्रसिद्धो नारायणएवात्र महेश्वरशब्देनापिप्रतीयते । अनन्तरंच नारा
यणानुवाके तस्यैव सर्वेश्वरत्वं ब्रह्मशिवयो स्तद्विभूतित्वञ्च प्रतिपाद्यते ।

यच्च बृहदारण्यके " यएषोन्तर्हृदय आकाशस्तस्मिंश्चेते सर्व
स्यवशी सर्वस्येशान " इत्यादिना आकाश[illegible]
न्तर्वर्तितया ईशानशब्देनरुद्रः प्रतिपाद्यतइ[illegible]
अत्राकाशशब्दस्य परमपुरुषवाचित्वाभाव[illegible] । तदभावश्चाकाशश
ब्दस्य भूताकाशे प्रसिद्धिप्राचुर्येण तस्यैव प्रतीतेः, तदपवाद
हेतोश्च परमपुरुषासाधारणधर्मान्वयस्या भावात । हृदयान्तर्वर्तित्वं
" तस्यान्तेसुषिरँसूक्ष्म " मिति हृदयान्तरवच्छिद्र सुषिरशब्दवाच्य
भूताकाशस्यापि सम्भवति । परमपुरुषधर्मान्वयात् " दहरोस्मिन्नन्तर
आकाशस्तस्मिन्यदन्त " रित्यत्रा काशशब्दस्य तद्वाचित्व निश्चयः ।
हार्त्वाकाशे शयानस्य वशित्वादि गुणश्रवणात् सएव परमपुरुषेन
तादाश्रयशब्दनिर्दिष्ट इत्यवसीयते । " तत्रापिदहं गगनं विशोक स्त-
स्मिन्यदन्तस्तदुपासितव्य " मित्यत्रापि अपहतपाप्मत्व विशोकत्व
श्रावणेन गगनशब्दस्य परमपुरुषत्वा वगमात् । अतो नात्रापि देव
तान्तरोपास्यत्वं प्रतीयते ।

यच्चोक्तं, अथर्वशिखायां " कारणन्तुध्येय स्सर्वैश्वर्यसम्पन्न स्स-
र्वेश्वरश्शुभ्राकाशमध्ये ध्येय " इत्यादिना आकाशाख्यपरमपुरुषान्तर्व-

र्तिन शंभ्वात्मनोरुद्रस्यो पास्यत्वं प्रतीयत इति । तदप्युक्तरीत्या ऽऽकाशशब्दस्य हृदयाकाशवाचित्वेन परमपुरुषपरत्वाभावा त्तदन्तर्वर्ति-नश्च कारणत्वादि भगवदसाधारणगुणाश्रयत्व श्रवणात्, शंभुशिवशब्दयोश्च रुद्रादन्यत्रापि लोकवेदयोश्च प्रयोगदर्शनात्, " विश्वाक्षं विश्वशंभुवं । शाश्वतँशिवमच्युत " मिति नारायणेपि दृष्टप्रयोगत्वात्, नारायणस्यैवात्र ध्येयत्वा वगमादयुक्तम् ।

किञ्चास्मिन्वाक्ये " कश्चध्येय " इत्युपक्रम्य " कारणन्तुध्येय " इति कारणत्वानुवादेन तस्य ध्येयत्व विधानावगमात् अनुवादस्यच्च प्राप्तिसापेक्षत्वात्, तत्प्रापकमहोपनिषदादिषुच नारायणस्यैव कारणत्वनिर्णयात्, सएवात्र ध्येयतया विधीयत इति निश्चीयते । अतएवात्र " ध्यायतेशान " मिति ध्येयतयोक्त ईशानः " पतिंविश्वस्य " इत्यादि प्रसिद्धो नारायण एव ।

यःपुनः " ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वेसंप्रसूयन्त " इति विष्णोः कार्यमध्येनिवेशः, सचास्य वाक्यस्योक्तरीत्याध्येयत्व विधिपरतया संप्रसूयन्त इति श्रुत्यन्तर प्रसिद्ध वस्त्वनुवादत्वावगमात्, श्रुत्यन्तरेच ब्रह्मादीनां कर्मनिमित्तसृज्यत्व लक्षणोत्पत्ति प्रसिद्धेः, भगवतश्च " अजायमानोबहुधाविजायत " इत्यादिषु जगदुपकारार्थं स्वेच्छावताररूपजन्मावगमात्, इन्द्रानुजरामकृष्णादिवत् ब्रह्म रुद्रमध्यवर्तितया विष्णुत्वेनावतारविषयइत्यवगन्तव्यं । तथाच पञ्चमवेदे - " रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवा " निति । अत्रध्येयत्वविधिपरे वाक्ये विष्णूक्तिर्ध्येयत्वोपयोगिसौलभ्यप्रदर्शनाय ।

यत्तु - " सत्यं ज्ञानमनन्तं ब्रह्म " त्यत्र परमव्योमशब्देन भगवन्तं निर्दिश्य तदाधेयतया उपास्यं ब्रह्मप्रतिपाद्यत इति । तदप्ययुक्तं, अत्रापि ब्रह्मणएवध्येयस्य " तस्माद्वाएतस्मादात्मनआकाशस्संभूतः " " तस्माद्वाएतस्माद्विज्ञानमया दन्योन्तर आत्मान

न्दमयः" " सयश्चायं पुरुषेयश्चासावादित्य " इत्यादिषु जगत्कारणत्व जगदन्तरात्मत्वादित्यमण्डलान्तर्वर्तित्वादि भगवदसाधारण धर्मसम्बन्धश्रवणात्, आधारस्यच परमव्योम्नस्तदभावा त्तस्यैवोपास्यत्वमुक्तं । अतः परमव्योमशब्दः " तदक्षरे परमेव्योमन् " " तद्विष्णोः परमंपदँ सदापश्यन्तिसूरयः " " हिरण्मयः परेलोकेविराजं ब्रह्मनिष्कळ"मित्यादि श्रुत्यन्तरप्रसिद्धदिव्यलोकपरः ।

यत्त्वथर्वशिरसि प्रथमखण्डेरुद्रेण स्वस्यसर्वैश्वर्यं घोषितं, तत् " सोन्तरादन्तरम्प्राविश " दिति परमात्मानु प्रवेशादुक्तमिति श्रुत्यैवव्यक्तं । " सोन्तरादन्तरंप्राविश " दितिरुद्रवाक्ये 'स' इतिपरोक्षनिर्देशस्वारस्यात्, " प्राविशदि " तिप्रथमपुरुषनिर्देशाच्च रुद्रादन्यः परामात्मारुद्रस्यान्येषां चान्तरात्मतयास्थितइति प्रतीयत इति । नचवाच्यं "नान्यः कश्चिन्मत्तोव्यतिरिक्तइती" तिशब्दे रुद्रवाक्य समाप्त्यवगमात् रुद्रव्यतिरिक्तस्य परमात्मनो प्रस्तुत्वेनसइति तच्छब्देन परामर्शायोगात् प्रस्तुतस्यरुद्रस्य परामर्शसम्भवाच्च 'सोन्तरादन्तर' मितिवाक्यं नरुद्रवाक्यं, अपितु वेदवाक्यमेव , तत्ररुद्र एव सर्वान्तरात्मतयाप्रविष्टः परात्मेतिप्रतिपाद्यते, नरुद्रव्यतिरिक्तः कश्चिदिति । सोहमित्यादिप्रपंचेन रुद्रवाक्यसमाप्त्यप्रतीतेः, इतिशब्दस्याहेतुप्रकारयो रन्यतरार्थत्व सम्भवाच्च, सोन्तरादितिवाक्यस्यरुद्रवाक्यत्वावगमात्, " अहमेवैकः प्रथममास " मित्यादीनां सर्वात्मभूतपरमात्मनस्स्वात्मतया रुद्रेणप्रस्तुतत्वात् सइति तच्छब्देनपरामर्शसम्भवाच्च, सोन्तरादितिवाक्ये रुद्रव्यतिरिक्तस्यैव परमात्मनोरुद्रान्तरात्मत्वेन प्रवेशनिश्चयात । अतोरुद्रादन्य स्तदन्तरात्मानारायणएव रुद्रवाक्ये अहं शब्देन रुद्रात्मत्वेन निर्दिश्यतइति निश्चीयते । सोन्तरादिति वाक्यस्य श्रुतिवाक्यत्वेपि पूर्वोक्तान्यपरानेक श्रुत्यन्तरानुरोधात् "प्राविशदि"त्यस्य "यस्ययस्यहि योभाव स्तेनतेनहित न्नरं । अनुप्रवि-

श्यमेधावी क्षिप्रमात्मवशंनयेदि" तिवद्रुद्रचनुग्रवेशपरत्वसम्भवाच्चानेनवा क्येन रुद्रएव सर्वान्तरात्मानं भगवन्तं समाधिना प्राविशत् साक्षात्कृत वानिरुच्यत इत्यर्थोवसीयते । अतोस्मिन्वाक्ये स्वान्तरात्मानारायणएव रुद्रेणाहमिति निर्दिश्यते । यथाकौषीतकीब्राह्मणे प्रतर्दनविद्यायां "प्रतर्दनो ह्वै दैवोदासिरिन्द्रस्यप्रियंधाम्रोपजगामे "त्यादौ "त्वमेवमेवरंवृणीष्वयंत्वं मनुष्याय हिततमं मन्यस " इति मोक्षोपायं पृच्छते प्रतर्दनाय " मामेव विजानीहि प्राणोस्मि प्रज्ञात्मा तम्मामायु रमृत मुपास्वे " ति वदिन्द्रस्स्वान्तरात्म परमात्मोपासनं मोक्षसाधन मित्युपदिशति । यथाच श्रुत्यन्तरे - " तदेतत्पश्यन् ऋषि र्वामदेवः प्रतिपेदे अहं मनु रभवं सूर्य श्चाहं कक्षीवा नृषि रस्मि विप्र " इत्यादिना ब्रह्मण स्सर्वान्तरात्मत्वं सर्वशब्दानां तत्पर्यवसायित्वंच " यस्या त्मा शरीरं " " एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायणः " " तदैक्षत बहुस्यां प्रजा ये ये " त्यारभ्य " अनेन जीवेना त्मना नुप्रविश्य नामरूपे व्याकरवाणि " " सो कामयत बहुस्यामि " त्युपक्रम्य " तदनुप्रविश्य सच्चत्यच्चाभवदि " त्यादि श्रुतिप्रसिद्धं समाधिना साक्षा त्कुर्व न्वामदेवः अहं शब्देन स्वान्तरात्मानं परमात्मानं निर्दिश्य, तत्सामानाधिकरण्येन मनुसूर्यादीन् व्यपदिशति । तथाच प्रह्लादः - " सर्वगत्वा दनन्तस्य स एवाह मवस्थितः । मत्तः सर्वं मयि सर्वं सनातन " इत्यादि वदति । एतच्च सर्वं " शास्त्रदृष्ट्या तूपदेशो वामदेववं " दित्यस्मि न्नधिकरणे सूत्रकारेणैव निरणायि । महाभारतेच - " विष्णु रात्मा भगवतो भवस्यामिततेजसः । तस्मा द्भवन्तुर्ज्यासंस्पर्शं स विषेहे महेश्वर " इति रुद्रान्तरात्मत्वं विष्णोः प्रतिपाद्यते । तथा तत्रैव - ब्रह्मरुद्रसंवादे ब्रह्मा रुद्रं प्रत्याह " तवान्तरात्मा ममच येचान्ये देहि संज्ञिताः । सर्वेषां साक्षिभूतो सौ नग्राह्यः केन चित् क्वचित् ।" इति । तथा तत्रैव ब्रह्मरुद्रौ प्रस्तुत्य " एतौ द्वौ

विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ । तदा दर्शितपन्थानौ सृष्टिसंहार कारकौ ॥ " इत्युक्तम् ।

यच्च द्वितीये खण्डे " यो वै रुद्रं स्स भगवा " नित्यादि देव वचनम् । तच्च रुद्रवाक्यानुरोधित्वेन तदैकार्थ्यावगमाद्, रुद्रवाक्यस्य चोक्तरीत्या तदन्तर्याम्याधारत्वनिर्णयात्, अनन्यपरानेक श्रुत्यन्तरानुगुण्याच्च नरुद्रस्य सर्वैश्वर्यपर मित्यवसीयते ।

यच्च तृतीयचतुर्थयोः रुद्रनामनिर्देशतः तन्निर्वचनमुखेन तदैश्वर्यपरत्वमुक्तम् । तदपि तयोः " स ॐकारो य ॐकार स्स प्रणवो यः प्रणवः " इत्यारभ्य ॐकारादिमहादेवान्तं प्रणवनामनिर्देशनिर्वचनपरतया प्रसिद्धरुद्रपरत्वप्रसंगाभावा दयुक्तम् । रुद्रादि शब्दानां प्रणववाच्यपरमात्मपरत्वेपि उक्तरीत्या भगवत एव परमात्मत्वनिर्णयात्, अस्मिन्वाक्ये भगवच्छब्दसामानाधिकरण्याच्च भगवत्परत्वमेव न्याय्यम् ।

यच्च पंचमे खण्डे रुद्रोपासनस्य मोक्षोपायतया विधानम् । तदप्युक्तेन न्यायेन तदन्तर्यामिपरमात्मपर मित्यवसीयते । यथा छान्दोग्ये मधुविद्यायां " असौवा आदित्यो देव मधु " त्याद्युपक्रम्य वस्वादिदेवतो पासनं मोक्षोपायतया विधीयमानं तदन्तर्यामि परमात्मोपासनपर मिति " मध्वादिष्वसम्भवादि " त्यधिकरणे निर्णीतम् ।

यच्च तत्र तदंगतया भस्मसंस्पर्शविधानम् । तच्च नतस्य सर्वोपासनशेषता मवगमयति । यथा सौत्रामणिशेषतया विहितस्य सुराग्रहस्य नसर्वक्रतुशेषत्वप्रसंगः ।

ननु " अणोरणीयानि " त्यनुवाके " यो देवानां प्रथमं पुरस्ता द्विश्वा धिको रुद्रो महर्षिः । हिरण्यगर्भं पश्यति जायमानँ सनो देव शुभया स्मृत्या संयुनक्ती " ति हिरण्यगर्भोत्पत्तेः प्रागवस्थि-

तत्व श्रवणेन रुद्रस्य सर्वकारणत्वं प्रतीयत इति चेत्? नैवम् । नह्यत्र हिरण्यगर्भोत्पत्तेः प्रागवस्थितत्वं श्रूयते । किन्तु हिरण्यगर्भोत्पत्तिदर्शित्वम् । नच तावता रुद्रस्य ततः पूर्वभावित्वसिद्धिः । " विश्वाधिकोरुद्रोमहर्षि " रिति योगप्रभावेन कालत्रयवर्ति सर्ववस्तुसाक्षात्कारित्वेन विश्वेभ्यो योगिभ्योधिकतयावगतस्य पश्चाद्भाविनोपि अतीतहिरण्यगर्भजन्मदर्शित्व सम्भवात । हिरण्यगर्भोत्पत्तेः पश्चाद्भावित्वं रुद्रजननस्य महोपनिषदादिषु प्रसिद्धत्वात । " सनोदेवश्शुभयास्मृत्या संयुनक्ती " ति भगवदुपासनो पयोगितया रुद्रानुग्रहस्य मुमुक्षो स्तदपेक्षत्व वचनम् । तथाच महाभारते उमामहेश्वरसंवादे रुद्रवचनं " उपास्योहं सदा विप्रा उपायोस्मिहरेःस्मृता " विति । अत्र ' शुभयास्मृत्ये ' ति भगवत्स्मृत्या अस्मान् संयोजयती त्युच्यते । अथवा ' योदेवानां प्रथममि ' ति यच्छब्देन हिरण्यगर्भकारणतया श्रुत्यन्तरप्रसिद्धानुवादात् नारायणमेवाभिधत्त इत्यध्यवसीयते ।

श्रीरुद्रश्च नरुद्रस्य सर्वैश्वर्यप्रतिपादनपरः । अत्र जगत्कारणत्व मोक्षप्रदत्वादि सर्वेश्वरसाधारण धर्मप्रतिपादना दर्शनात् । अग्निचयनेच अर्थान्तरपरतया तद्विनियोगात् । पूर्वोक्ता नन्यपरानेकश्रुत्यन्तर विरोधाच्च । अतएव त्वरितरुद्रपंचब्रह्ममन्त्राश्च नरुद्रदेवभवपराः । " सर्वोवैरुद्र " इत्यादि निर्देशस्तु " ब्राह्मणोवैसर्वा देवताः " " आपोवाइदँसर्व " मित्यादिवत् द्रष्टव्यः । " ब्रह्माधिपति ब्रह्मणोधिपतिः" - वेदप्रवर्तकः, तन्मुखेन ब्रह्मणोनिर्वाहकश्च, ब्रह्मज्ञानोपयोगी शिवोमे सदास्त्वित्यन्वयः । उक्तेनैवन्यायेन " एक एव रुद्रो नद्वितीयायतस्थ " इत्याद्यपि व्याख्येयम् ।

ननु - " अथ योह खलु वाअस्य राजसोंश " इत्यादि मैत्रायणीथश्रुत्याव्रमूताना मंशत्वावगमात अत्र , परमात्मातिरिक्त इति प्र-

तीयते । नैवं, उक्तरीत्या विष्णोरेव परमात्मत्वनिर्णयात् , तद्विषयो यच्छब्द स्तदवतारमात्रपरः, तस्यांशिन स्सर्वभूतब्रह्मादिविजातीयतया वतारः । औपचारिको वा ।

एतेन " ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तय " इत्याद्यपि व्याख्यातम् । नच " स ब्रह्मा स शिव " इत्याद्यभेदोपदेशात् ब्रह्मादीनां नारायणेन स्वरूपैक्य माशंकनीयम् , स्रष्टृत्वसृज्यत्वार्च्यत्वार्चकत्वादिभेदव्यपदेशात् । अभेदव्यपदेशस्तु तदात्मत्वनिबन्धन इति प्रागेवोक्तम् ।

श्रुत्यन्तराण्येव मुक्तरीत्या नेतव्यानि । अत स्सर्ववेदेषु वेदान्तेषुच सर्वस्मा त्परत्वेन प्रतीतं परंब्रह्मनारायण एव , नब्रह्मरुद्रादिरिति सिद्धम् ।

तदेवं प्रत्यक्षश्रुतिभि र्नाराणस्यैव परत्वावगमात् पौरुषेयवचसां तदनुरोधेनैव प्रामाण्या त्तदनुरोधीन्येव पुराणादीनि श्रुत्युपबृंहणतयो पादेयानि ।

किंच नारायणपराणां पुराणानां सत्त्वमूलतया प्रामाण्यं इतरेषां रजस्तमोमूलतया अप्रामाण्यंच पुरुषनिर्णये सुव्यक्त मुक्तम् । तस्मा न्नारायण एव मुमुक्षुभि र्जिज्ञास्यं परं ब्रह्मेति सिद्धम् ।

वात्स्य श्रीदेवराजार्य नयनानन्ददायिना ।
वरदेन कृत स्तत्त्व निर्णयः श्रुतिसंमतः ॥

इति श्रीवात्स्यवरदार्य विरचितः

तत्त्वनिर्णयः ॥

3155
R672
N02
KENDRIYA SANSKRIT VIDYA PEETHA
TIRUPATI.
LIBRARY

3-3-1966

Verified-1935.

VERIFIED 1989

VERIFIED-2001

CATALOGUED

